শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱণ্শঠকোপ শ্রীৱেদান্তদেশিক যতীন্দ্র মহাদেশিকৈরনুগৃহীতং

# ॥শ্রী লক্ষ্মীনৃসিংহমঙ্গলম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রী লক্ষ্মীনৃসিংহমঙ্গলম্॥

মঙ্গলং শ্রীগুরুভ্যোঽস্তু তদ্গুরূণাং চ মঙ্গলম্।
তত্রাদ্যগুরৱে নিত্যং শ্রীনৃসিংহায মঙ্গলম্॥ **1**॥

শেষিণে সর্ৱভূতানাং সর্ৱলোকহিতৈষিণে।
ভদ্রাযান্তর্যমযতে শ্রীনৃসিংহায মঙ্গলম্॥ **2**॥

সর্ৱৱ্যাপ্তিমতে নিত্যং দিৱ্যমঙ্গলমূর্তযে।
সর্ৱত্র পরিপূর্ণায শ্রীনৃসিংহায মঙ্গলম্॥ **3**॥

দানৱেন্দ্রশিশোর্ৱাক্যং কর্তুং সত্যং মহীতলে।
স্তম্ভাজ্জাতায দিৱ্যায শ্রীনৃসিংহায মঙ্গলম্॥ **4**॥

মত্তদ্বিপনিভং দৈত্যং নখাগ্রৈর্ৱজ্রসন্নিভৈঃ।
সদ্যো হন্ত্রে চ তং ক্রোধাৎ শ্রীনৃসিংহায মঙ্গলম্॥ **5**॥

সটাপটলভীমায প্রহ্লাদানন্দদাযিনে।
নমস্কৃতায দেৱাদ্যৈঃ শ্রীনৃসিংহায মঙ্গলম্॥ **6**॥

দৈত্যেন্দ্রপুত্রং প্রহ্লাদং অভিষিচ্য কৃতাঞ্জলিম্।
সন্তুষ্টহৃদযাযাশু শ্রীনৃসিংহায মঙ্গলম্॥ **7**॥

ক্ষেত্রে ৎৱহোবিলে দিৱ্যে গরুডাদ্রৌ কৃপাৱশাৎ।
জ্ৱালাদিনৱরূপায শ্রীনৃসিংহায মঙ্গলম্॥ **8**॥

আশ্রিতাভীষ্টদানায স্ৱারাধনপরান্ গুরূন্।
সংপ্রাপ্য হৃষ্টচিত্তায শ্রীনৃসিংহায মঙ্গলম্॥ **9**॥

নিত্যারাধনতুষ্টায নিত্যভোগপ্রদাযিনে।
নিত্যসঞ্চারদক্ষায শ্রীনৃসিংহায মঙ্গলম্॥ **10** ॥

মঙ্গলম্ শ্রীনৃসিংহস্য যঃ পঠেৎ প্রত্যহং শুভম্।
লক্ষ্মীনৃসিংহকরুণা দদ্যাৎ তস্য সুমঙ্গলম্॥ **11** ॥

ইত্থং শ্রীৱেদচূডার্যযতীন্দ্রেণ কৃতং শুভম্।
মঙ্গলং শ্রীনৃসিংহস্য জীযাদাচন্দ্রতারকম্॥ **12** ॥

॥ ইতি শ্রী লক্ষ্মীনৃসিংহমঙ্গলং সমাপ্তম্॥